जनस्य आगारं स्टहं जवनिका स्तिरस्करिण्यः अंबराणि वस्त्राणि तैः सहितं भवति हिमशीताः सर्वेपि यादिशिगृहाण्याश्रयांतः सुरतसुखमनुभवंतीति भावः तेन मम मात्रि दुःखमुद्भवतीति ध्वनिः ननु तमपि तथा सुखमनुभ

वस्वेति चेत्तत्राह प्रेति इह हेमंते मे मम अनुरंजनस्य विलासस्य प्रारब्धं हतं नष्टं यद्वा मे अनुरंजयतीत्यनुरंजनः प्रियः तस्य प्रारब्धं हतं असंनिधानादुभयोरपि दुर्भरं दुःखमिति भावः यद्वा नायकं प्रत्युक्तिः साय था हे रम्यमनोहर हेमंतः कांतानां प्रियविरहे सति काननश्रीः कुत्सितमुखकांतिर्यस्मिन् तादृशो विलसति भाति यतः अत्र अस्मिन्प्रियविरहे सति कांतानां नश्रीः नश्रीः नञर्थस्य नशब्दस्य सुप्सुपेति समासात् अश्रीरिति फलितं तेन विपत् इत्यर्थः सा कान किंतु सर्वापि विपदेव भवतीति भावः इदं कस्मादीदृशं दुःखमिति चेत्तत्राह आगारं सजवनिकांबरं जनस्येति पूर्ववत् अन्यरतिदर्शनं स्वस्य कामोद्दीपकं भवतीति भावः तस्मात् हे अनुरंजन प्रिय इह हतं नष्टं मे प्रारब्धं स्य अपाकुरु एत्य संगं देहीति भावः प्रहर्षणीयं वृत्तं म्नौज्रौगस्त्रिदशयतिः प्रहर्षणीयं २

मस नायकः
२

कांतेति किंच मानीसौंदर्यादिभिमानवान् कांताजनः स्त्रीसमुदायः स्वपतिभिः सहमुमुदे सुरतानंदं प्राप
हिनिश्चये माहवास्महतमारब्धस्येत्यर्थः जनस्य लोकस्य मुदे संतोषाय हिमानी हिमसंहतिर्नास्ति हा खेदे
हेमंतसौभाग्यमवलोक्य मानिन्योभिमानं त्यक्त्वा प्रियैः सहक्रीडंति मम तु तेन विना दुःखप्रदोयं काल इति भावः

कांताजनः स्वपतिभिर्मुमुदे हिमानी हा नाहमस्य न जनस्य मुदे हिमानी
पुष्टिं प्रयाति जनवृंदमिदं सदैवं गात्रं ममैति तनुतां सगदं सदैवं ३

अपिच सदैवं पुण्यवदित्यर्थः इदं जनवृंदं पुष्टिं पुष्टिं वा धान्यादिसंपदेति शेषः प्रयाति मम तु गात्रं वपुः
सदा सर्वरीत्या सगदं सकामरोगं सत् तनुतां कार्श्यं एति पुष्टिप्रदोपि ऋतुरयं मे तनुत्वप्रद इति महान्खेद इति भा

५

स्वास्थ्य दृष्ट्या अनुकूल असी ही ऋतु ... माझ्या ... कारणीभूत झाली आहे.

चंडीने आच्छादित सूर्य (धुक्याने)

६

वः हिमानी हिमसंहतिरित्यमरः वसंततिलकावृत्तं ज्ञेया वसंततिलका तभजा जगौ ग इति लक्षणात् ३ श्रीः
ननु हिमभयं हर्तुं रविः सेव्य इति चेत्तत्राह अपीति हिमेन रूषितश्चर्चितः रविरपि मेरोधन्वदेशो उषितः स्थि
तः द्विजइवातितरां न भाति न प्रकाशते हि मरुदेशवासी मलिनो द्विज इव रूक्षस्तेजोहीनो हिमपीडां न हरतीति भा

अपि न भाति रविर्हिमरूषितो द्विज इवातितरां हिमरूषितः
न जनमोदकरींदुकलाविलाकलुषसंकुलितेव कलाविला ४

वः एवं तर्हि निशि चंद्रेण मनोरंजनं विरहिण्या कार्यमिति चेत्तत्राह नेति आविला हिमकलुषा इंदुकला कलौ
युगे कलुषसंकुलिता इला भूरिव जनमोदकरी लोकानंदकर्त्री नास्ति न ततोपि रंजनमिति भावः उपमायमकयोः सं
सृष्टिः कलुषो नच्छ आविल इत्यमरः ४

किंच एतीति शीतपवनो हिमालयाद्गिरेः एति तेन हेतुना उत्तमा प्रियसंगवती जनता जनसमूहः आलयात् गृहाद्बहिरिति शेषः नेति न निर्गच्छति यद्वा हे उत्तमे शीतपवनो मानां आलयात् लयपर्यंतं नाशो भवेत्तावदपि हि रिप्वर्थः एति प्राप्नोति हिमवायुना मम नाशो भविष्यति तथापि त्वं नायासीति व्यंग्यं कुर्वंत्ता हिमतस्कारां स्वयं नाया

एति शीतपवनो हिमालयान्नेति तेन जनतोत्तमालयात्
भांति शाखिषु हिमोदबिंदवस्तारकांतिपरिहारबिंदवः ५

सीतिचेत्तत्राह तेन दुःखेन जनता माहसीत्यर्थः आलयान्नेति गंतुं नो शक्तिरितिभावः किंच ताराणां मुक्तानां कांतिपरिहारे बिंदवः ज्ञाताः हिमोदबिंदवः शाखिषु तरुषु भांति हतेदाहइव भवतीतिभावः रथोत्पताद्धतं शन्नरा विहरथोत्पतालगाविति ५

ननु किं वृक्षोपरितः आगमनं भवति न हि पथा तर्हि तेनैवाम्येगंतामित्यत्राह जलानीति सर्वत्र जलानि शीतलानि संति मार्गेन द्यादिषु शीतजलस्पर्शान्मा शेमे भविष्यतीतिभावः तर्हि शिलासु पादौ निधायागम्यतामित्यत्राह सर्वाणि शिलातलानि तथैव हिमान्येव संति शिला अपि अस्पृश्या इतिभावः तर्हि नौकादिभिर्नद्यादि

जलानि सर्वत्र च शीतलानि तथैव सर्वाणि शिलातलानि
प्रफुल्लितान्यब्जवनीकुलानि पुष्पैररण्यानि च संकुलानि ६

तीर्त्वाऽऽगंतव्यमित्यत्राह अब्जवनीकुलानि पद्मिनीवृंदानि प्रफुल्लितानि विकसितानि तत्रापि फुल्लारविंदद्रोणैः कामो मां मारयिष्यतीतिभावः तर्हि वनमार्गेणागम्यतामित्यत्राह अरण्यानि पुष्पैः संकुलानि व्याप्तानि तत्रापि स्मरः शरैः सर्वैर्मां ताडयिष्यतीतिभावः तस्मात्त्वयैवागत्याहं जीवयितव्येतिध्वनिः उपजातिवृत्तं ६ ६

प्र·मा·स·क
५

संमरूपालयते यः सनिंदउपालंभइतिकोशः धरणिरिति तरुणैः प्रौढैः तृणैः तृणजातिविशेषैः खर्जूरीकेतकीतालीकदलीचंपकद्रुमाइतिश्रमरः विशालैः विशिष्टाः शालाः विशालाः एतन्नामानोवृक्षाःतैः इतायुक्ताधरणिः भूमिः विहृतौविहारे उचितायोग्यासमुच्चकास्ते शोभते किमेतन्महत्सौभाग्यंयतः सर्वदाविलणतरुद्धामेदिनीवर्ततएवेतिचेन्नेत्याह कीदृशैस्तरुभिर्विशालैश्च सफलैः पुष्पयुतैः विशालैः शाखादिभिः प्रस्तृतैश्च एवंनसदैवेतिभावः यतएवंततस्तयेदानीमागंतव्यंयतोनायासिविहारसमयेततस्त्वंमूर्खशिरोमणिरसिकिंवक्तव्यमितिव्यंग्यं किंकरोमित्वमेवनासिमेप्रियाकिंतुअन्याअपिसंतिताः विहायकथंमयात्वन्निकटमेवागंतव्यमितिचेत्तत्राह नेति हेअनुच्च नोच्चोनुच्चस्तत्संबुद्धिरनुच्च सर्वाभिरुणाधिगुणवतींमांवि

५

१०

हायान्याश्रितत्वान्नीचशिरोवतंसेत्यर्थः अहंतेदयिताः काः संतिताः नविजानेनजानामि यद्विजानामितर्हिताः शिक्षयामीतिभावः यद्वा अहमेवप्रियास्मि इतिजाने अन्याः काश्चनप्रियाः नैवजाने अतइत्थंत्वांप्रार्थयामीतिभावः यद्वातेनेकाः दयिताः संतीतिनविजानेकिंतुजानाम्येवपरंतुविरहाग्नितप्ततन्वामयाकिंचिदपिसंप्रतिकाकुरिति ४ दुर्नवाक्यतेइतिभावः यद्वाअनुच्चकाइतिदयिताविशेषणंतस्यनोच्चकाअनुच्चकाः मेप्राणवल्लभहरणात्नीचाइत्यर्थः तथाचेदंनीचाः स्त्रियोयतस्तेप्रियास्ततस्तवनीचत्वमनिर्वचनीयमितिध्वनिः यद्वा नविजानेदयितासमुच्चकास्तेइतिपाठः नदा हेअसमुच्च सम्यगुच्चः समुच्चः नसमुच्चः असमुच्चः तत्संबुद्धौहेअसमुच्च मध्यमश्रेष्ठ बह्वीषुसक्तत्वादितिभावः अतएवअदयितअप्रिय श्रेष्ठानांश्रेष्ठएवप्रियइति

भावः तेनाद्यपर्यंतंत्वेदंदत्तंनजानाम्यद्यतुजानाम्यतःप्रियोपिपूर्वमिदानीमप्रियोजातोसीतिव्यंग्यं नेकाःसंति
ताःनविजाने किंतासांज्ञानान्नेफलंयतोऽप्रियोऽप्रियासंगतइतिहेतोरितिभावः यद्वा नविजानेदयिताःसमुत्र
कास्तेइतिपाठः तदाहेसमुत्रसम्यक्श्रेष्ठ मदितरास्तेकाःप्रियाःसंतीतिनविजाने यद्विजानेतर्हित्वांनैवप्रार्थया

धरणिस्तरुणैस्तृणैर्विशालैः सफलैःपुष्पयुतैर्लता विशालैः
विहृताबुचितासमुत्रकास्तेनविजानेदयितास्त्रनुत्रकास्ते ७ =समु=पाठः=

मीतिभावः यद्वाविपरीतलक्षणयासमुत्रप्रतिनीचेत्यर्थः तेनेदानींकालेमादृशीत्यागस्त्वादृशस्यनीचस्ययो
ग्यएवेतिव्यंग्यं औपछंदसिकंवृत्तं विषमेससजागुरूसमानेस्भरयाश्छंदसिकंतदेयपूर्वमितिलक्षणात् ७

समवेक्ष्येति किंच हेबुधान्यमूर्खपरांश्रेष्ठांधान्यस्यमांशोभांसमवेक्ष्यचविलोक्यापिमांप्रविहायत्यक्त्वापरांएषि
गाघासिइतियत्तदिदंहेदृग्रस्य पूर्वपरानुसंधानरहितस्यदेशकालानभिज्ञस्यवानेतवइतिमूर्खत्वसूचना अर्हमपि
योग्यमपिभवतीत्यन्वयः तथाहि कुविचारःकुजनेशस्यते अविवेकोमूर्खैःप्रशस्तोभवतीत्यर्थः हेमंतेसर्वेपिस

समवेक्ष्यचधान्यमांपरांप्रविहाय्येबिबुधान्यमांपरां
इदमर्हमपीदृशस्यते कुविचारःकुजनेहिशस्यते ८

रसाःसरसाभिःसहान्नधान्यादिपरिपाकरसमनुसृत्यरतिसुखमनुभवंतित्वंतुसरसांमांविहायगतोसीतिनीर
सत्वान्निंद्यं रीतितात्पर्यं अर्थांतरन्यासयमकयोःसंसृष्टिः वैतालीयंछंदः पादांत्यहीनमौपछंदसिकंवैतालीय
मितिलक्षणात् ८

सेवंतिकेति किंच सेवंतिकाकुसुमैः कल्पिताः कांतमालाः रम्यहाराः ययासा सुनीलवसनीकृताः सत्तमालाः प्रौढतापि च्छदसाः ययासा प्रोत्फुल्लकुंदैः परिगुंफितानियानिजालानितैः कांतारम्या परिखस्थाः जटीकृताः तृणान्येवअलकांताः केशप्रांताः यया सा क्षोणीपृथ्वीहेमंतंरतिसंगघटति नानाविधशृंगाररचनांविधायपश्चान्निरपेक्षअभिसारिकीभूय

सेवंतिकाकुसुमकल्पितकांतमाला क्षोणीसुनीलवसनीकृतसत्तमाला

प्रोत्फुल्लकुंदपरिगुंफितजालकांताहेमंतमेतिपरिखस्थतृणालकांता ११

हेमंतंकांतंरंतुंसंगच्छतितस्मादीदृशेकामोदयकालेममपरित्यागस्तवनोचितइतितात्पर्यार्थः समासोक्तिरलंकारः विशेषणमात्रसाम्येनाप्रस्तुताभिसारिकात्वस्यक्षोणीगम्यमानत्वात् भेदेऽभेदलक्षणातिशयोक्तिश्चानयोः संसृष्टिः ११

नितः१

फुल्लेति किंच फुल्लपद्ममेववदनंयस्यसः प्रौढंप्रगल्भंयथातथारवेलंतियानिअतसीकुसुमान्येवइषवोबाणाः यस्यसः चलाःघाः अलितरुण्यःभ्रमर्यः ताएवदृक्यस्यसः कुंदस्यपुष्पाण्येवरदनाःदंताः यस्यसः विषमेषुः मदनः मांईदृशींविरहसंतप्तामित्यर्थः अतीवअत्यंतमेवहसन्नीवउपहसतिकिं त्वदिरहेमदुर्दशांनिरीक्ष्यमदनः

फुल्लपद्मवदनोविषमेषुःप्रौढखेलदतसीकुसुमेषुः

मांचलालितरुणीदृगतीवकुंदपुष्परदनोहसतीव १२

नोपयंशठःकांतद्वोपहसतीतिभावः तेनस्वकामिन्याः परेणोपहासकरणंनकेश्चिदपिसह्यतेत्वयातुसह्यतइति निर्लज्जोसीतिव्यंग्यं रूपकोत्थापितोत्प्रेक्षालंकारः स्वागतावृत्तं स्वागतारनभगौ[illegible]गुरूतिलक्षणात् १२

अगुरुः स्या१

मदनमुपालभते कुलेति हे काम त्वं कामिनीनां कुलगुरुरसि वंशपरंपरया रतिदेशिकोसीत्यर्थः किंच कामिनि तरुणे पुंसि इत्थं श्लेषं प्रियतां प्रेम च बहु कुरुषे अभिमतकामिनीलाभदानादित्यर्थः ततः कारणात्त्वं मयि इदं दूर वैरितं उपहासादिरूपं कपटं नानुरूपं न योग्यमित्यर्थः कारणांतरमाह यद्यस्माद्धेतोः ममेतिशेषः रूपं आत्मः

कुलगुरुरसि कामकामिनीनां बहु कुरुषे प्रियतां च कामिनीनां
मयि कपटमिदं न तेनुरूपं ज्वलति यदात्मविमुक्तकृशानुरूपं १३

आत्मः विमुक्तप्रियविरहरूपकृशानुरग्निर्येन तत् तादृशं सत् ज्वलति दहति ततः कारणात्त्वयाहमुपहसितव्येति भावः प्रेमा ना प्रियता हार्दमित्यमरः पुष्पिताग्रावृत्तं अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति लक्षणात् १३

पुनः कांतं प्रार्थयति सीत्कृतिरिति हे नाथ सीत्कृतिः सीत्कारः तुहिनतः हिमेन मम अधरे ओष्ठे भवति तथा परुषाः कठोराः कंटकाश्च पयोधरे स्तने भवंति तथा कुत्सितानां व्रणानां किणाश्चिन्हानि तनुं शरीरं प्रतियंति प्राप्नुवंति त्वत्संगेन यद्भाव्यं तदेतत्सर्वं वैपरीत्येन कर्तृकें त्वया संभवति ततो महासंकटं पतितास्मीति भावः अतस्त्वं अत्र अस्मि

सीत्कृतिस्तुहिनतो मम अधरे कंटकाश्च परुषाः पयोधरे
यंति कुव्रणकिणास्तनुं प्रति त्राहि नाथ विषमेत्र संमति १४

न विषमे नारसदृशसंकटे इत्यर्थः संप्रति अद्यैव न तु विलंबेनेत्यर्थः मां त्राहि संरक्षस्वेत्यर्थः त्वदभावे यदेतद्दुःखप्रदं तदेव त्वय्यागते सुखकरं भविष्यतीति ततस्त्वमद्यैव शीघ्रमेहीति व्यंग्यं रथोद्धतावृत्तं रान्नराविह रथोद्धता लगाविति लक्षणात् १४

सुखेन१

संप्रतिसरोपंवदति नेति मेममकांतारेवनेसुखंसंतोषोनास्ति वनेतचः प्रभृत्यविकर्मकर्तुंनशक्यतइतिभावः न हिमुंभृत्पुपानादिनादेहत्यागः कर्तव्यइतिचेत्तत्राह मयाकांतारेदुर्गमार्गेगंतुंनोशक्यते यदिगमनशक्तिः स्यात्तर्हितवम पिकर्तुंशक्यतइतिभावः ननुनहितथैवचिरंस्थातव्यमित्यत्राह कांतनांत्र्यरिः यद्वाकांतत्र्वासावरिश्चरतत्संबोधनं
नसुखंमेकांतारेगंतुंनोशक्यतेवकांतारे तदसंगेकांतारेसयंगमिष्यतितनुरश्वकांतारे ३५ श्रीत्रिवे
हेकांतारेत्र्यरेइतिनीचसंबोधनंहेकांतत्वदसंगेसतितनुश्चदेहोपिस्वयंगमिष्यति एवंपाषाणहृदयस्यतवैवत्र्प्रसंगःम मसरणस्यैवपथंवर्ततेकिमर्थंभृत्पुपानादयोविषभक्षणादयोमरणोपायाः कर्तव्याइतिभावः नेनातिनीचोसितंयन्मांमर णपर्यंतमपिनैवावेक्ससेइतिव्यंग्यं कांतारंवर्त्मदुर्गमं महारण्येदुर्गपथेकांतारमितिचामरः गीतिछंदः १५ १५ १५ १०

ततस्मात्सेतोः२

संप्रतिनिरुपायासतीप्रार्थयते गिलितइति हेप्रियभवतावनजोदमुनात्र्प्रग्निः गिलितः भक्षितः तथासविषापियमुना कालिंदीत्र्प्रविषाविषहीनारचिताकृता त्र्प्रमुना प्रियंकरोतीतिप्रियकृत्कांतः तंसुखयतितेन मम शुक्शोकः सर वशिखीत्र्प्रग्निः तेनतवज्वलनंदाहः नभवेत् यस्माद्विषाग्निभक्षकस्त्वमसितस्मात्ममविरहजन्यसंतापाग्निनापि
गिलितोभवतावनजोदमुनारचितासविषाप्यविषाप्यमुना
त्र्प्रमुनातवतन्ममशुकशिखिनाज्वलनंनभवेत्प्रियकृत्सुखिना १६
तवदाहोनैवभवेत्ततः सर्वमपिस्वयंपरिहीयत्र्प्रीत्र्प्रमेत्वममतापाग्निंनिपीयजीवयेतिभावः सप्तार्चिरमुनाः शुक्रइत्य मरः त्र्प्रत्रकरुणरसोविप्रलंभजन्यः स्वभावोक्तिरसोचारुयथावद्वस्तुवर्णनमितिलक्षणात्स्वभावोक्तिरलंकारः तोट कंवदंत इहतोटकमंबुधिसैकरितमितिलक्षणात् १६

प्र.भा.टी.
११

अथ१

एहीति किंच अतसीश्रीहरेप्रियंगुपुष्पद्युतिस्कर हेश्रीहरे श्रीकृष्ण त्वं एहि एत्य किं करोमि तत्राह मे दर्शनं देहि दर्शनेन किं फलं तत्राह गात्रसंस्पर्शनं अंगसंगं च देहि तस्मात् किं फलं तत्राह हृत्तापो विरहज्वरः तं हंति तत् श्रीमुखस्य प्र
सन्नवदनस्य चुंबनं देहि ततोऽपि किं फलं तत्राह सुहृदां तत्ताना पापहं ते पादयोः सेवनं देहि आगमनात् दर्शनं ततोंगसंग

पि३

एहि हे त्वं घ मे दर्शनं श्रीहरे गात्रसंस्पर्शनं चातसीश्रीहरे
चुंबनं श्रीमुखस्यापि हृत्तापहं पादयोः सेवनं ते सुहृत्तापहं १७

स्तनोधरामृतपानं ततोंघ्रिसेवनं ततः पापनाश इति भावः यद्वा ते पादयोः सेवनं सुहृत्तापहं भवति तस्मात् एतत्त्वं दर्श
नादि देहीति चतुर्थपादवाक्यार्थस्य पादत्रयवाक्यार्थं प्रति हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिंगमलंकारः लक्ष्मीधरवृत्तं गः समुद्र
गणास्तत्र लक्ष्मीधर इति लक्षणात् १७

२१

दूर्णसीप्र१

२२

उपसंहरति गत्वेति हे सखि त्वं हरिणा कृतः वासो यस्मिन् स चासौ देशः प्रांतः स्तं गत्वा आख्येन मम संदेशं वाचिकं हेमंत
इति द्वितीयपद्यमारभ्य एहीति सप्तदश पद्यपर्यंतं पूर्वोक्तमित्यर्थः चेतश्चोरं मनोहरं हरिं प्रति वद कथय सहचरि
कासखी इति तद्वाक्यमिति शेषः श्रुत्वा आकर्ण्य यावत् गच्छेत् तावत् मायातः कपटेन सार्वविभक्तिकस्तसिल् लुप्तः

गत्वा तूर्णं हरिकृतवासं संदेशं चेतश्चोरं वद सखि मे संदेशं
श्रुत्वा गच्छेत् सहचरिका मायातस्तावल्लुप्तो हरिरपि तामायातः १८

अंतर्हितः हरिरपि तां राधिकां प्रति आयातः प्राप्तः अभूत् यदर्थं अंतर्हितं तस्तद्विमलं भवत् शृंगारवाक्यमाकर्ण्य सकौतु
कः सन् समाजगामेत्यर्थः संदेशवाग्वाचिकं स्यादित्यमरः जलधरमालावृत्तं अब्ध्यंगैः सा जलधरमालाम्भौ स्मा
विति लक्षणात् १८

प्र·मा·स·रु
१२

विप्रलंभगर्भितवर्णनेऽपि पद्यद्वयेन संभोगशृंगारमनुवर्णयति अथेति अथ श्रीकृष्णागमनानंतरं विदग्धा चतुरा सारा धिका मदनाग्निना विशेषेण दग्धा संतप्ता दिसती अंतिके स्वनिकटे प्रियं इष्टं हरिं अभिवीक्ष्य विलोक्य कुसुमानि कुं दानि यस्मिन् तत् विरचितकुंदकुसुममित्यर्थः शयनं शय्यां परिकल्प्य विरच्य मुकुंदं श्रीकृष्णं सविलासं यथा स्यात्तथा

अथ सा मदनाग्निना विदग्धाप्यभिवीक्ष्य प्रियमंतिके विदग्धा
शयनं परिकल्प्य कृत्तकुंदं सविलासं समपूजयन्मुकुंदं १९

समपूजयत् अर्चयामास यदर्थं नरो दुःखमवाप्नोति न तल्लाभे यत्सुखं भवति दें तेन निर्वाच्यमित्यर्थः तस्मादि यं चतुरा श्रीकृष्णार्थं संकेतस्थानं धामानं तत्र भयं यसंती दुःखिता न दुर्लाने सुखिनेति तात्पर्यं औपच्छंदसिकं वृत्तं १९ १२

२४

प्र·मा·री·
१३

रतिप्रसंगं वर्णयित्वा आशिषं प्रार्थयते सुविहरन्निति मणिजालैः कृता इंदिरा शोभा यस्मिन् तस्मिन्मंदिरे प्रियया स ह रन् सुष्ठु क्रीडन् अत एव प्रमुदितः संतुष्टः सः माधवः श्रीकृष्णः भुवनं जगत् परिरक्षतु सर्वान् संतः रक्षतु सः कः साधवः सज्जनाः यं अनुभजंति ध्यायंति च कारेण प्राप्नुवंति चेत्यर्थः खलु निश्चये द्रुतविलंबितं वृत्तं

सुविहरन्मणिजालकृतेंदिरे प्रमुदितः प्रियया सह मंदिरे अनुभजंति च यं
खलु साधवः स भुवनं परिरक्षतु माधवः २० इति श्रीविठ्ठलात्मजगंगाधर
कविविरचितं यमकप्रधानं हेमंतवर्णनात्मकं प्रसन्नमाधवाख्यं काव्यं संपूर्णं श्रीः

इति श्री स्वकृतप्रसन्नमाधवकाव्यटीका प्रसन्नराधिकानाम्नी संपूर्णा श्रीराधाकृष्णाभ्यां नमः श्रीललिते
१३

॥ह॰ली॰॥ ॥१॥ ॥मृत॥

श्रीगणेशाय नमः॥ अथ हरिलीलामृतं प्रारभ्यते॥ श्रीवसुतमभिनवरूपं वंदे गणपतिमहं वि
शालमतिं॥ यं नत्वाकृतकृत्या भवंति कवयः स्वकृत्यार्थे॥१॥ श्रीदक्षिणामूर्तिमहं प्रणम्य वि
शिष्टबुद्धिप्रतिभाकरं तं॥ कुर्वे यशोदातनयस्य लीला प्रदर्शकं ग्रंथमहो विविच्य॥२॥ निजज
नपूरितकामां कृतशिवकामां नमामि तां वामां॥ यस्याश्चरणसरोजे भ्रमन्ति जालिः सुधां भुं
क्ते॥३॥ तातं श्रीविठ्ठलं नत्वा विश्वनाथं गुरुं तथा॥ हरिलीलामृतं कुर्वे पिबंतु रसिका जनाः
४॥ कृतं यन्मया सन्निधौ श्रीजुलानास्वकुक्षिंभरेणक्षणं नर्तनं ते॥ जगन्मातरेनं समस्ताप
राधं करिष्येव गाहं हरेः कीर्तिसिंधौ॥५॥ अमंदम [illegible] रे विमलमार्गसिंधूदरे सुहास्यरु

१ — भुजङ्ग प्रयात — पृथ्वीछंद

चिराधरे मम मतिः समुज्जृंभताम्॥ यदंगरूपसंगिनी [illegible] ललितराधिकारंगिणी मुदं तनुसमु
दंचितागमदनेककामार्थिनी॥६॥ असुरकलुषभाराक्रांतमुद्रांगनितांतं जगदिदमवलो
क्याचारहीनं सुदीनं॥ अवतरसि तमीहे मायाधारभूतः स्वयंभूस्तव न सुमुदितां तातस्तं कमन्वेषयामि॥७
कंसभीतवसुदेवदेवकीकामपूरणकृतावतारकः॥ रसातिसन्निजशक्तिनोदनाद्धोगिराजमनुनो
मितं विभुं॥८॥ नंदयशोदाचरितं चरितं प्रसमीक्ष्य तत्र लीलार्थं मायाप्रेषणकर्तृदया
लवे कुरुत भोजनागनमनं॥९॥ रोहिण्या जठरे निधाय करुणान्मालीनि जालीयुनः शेषं पेषण
कारकः स्वजनदुःक्लेशप्रदानां निवं॥ देवक्या निजपूर्वमातुकदरे निद्रामवाप स्वयं सोऽयं

२ — मालिनी — रथोद्धता — २भाग — ८/१२/६/१३ — शार्दूलविक्रीडित

॥ ह०ली०॥
॥ २॥

योगद्रुताद्भुतांघ्रिभवभसंसारनोवितनुयान्हरिः॥ ३०॥ गर्भेपियंसुरवराविधिनोभुमुख्याः संस्तुय
काममनवापमवापुरिभ्याः॥ तंसर्वभूतहृदयस्थमगाधबोधंबोधायनेनोमिसुहृदंसुरयादवा
नां॥ ३१॥ जन्मापियस्यसुरभूसुरगोपगोपीधेनुद्विजांघ्रिपसुतहृणयादवानां॥ सेनायदे
त्यखललोकविदारणायतस्मैनमोभगवतेस्वदयार्णवाय॥ ३२॥ देवाःश्रीकृष्णजन्मामृत
रसलहरीम्नोणिलीलावगाहप्रोद्यच्चन्मोदमत्ताःकुसुमनिचयमेकायचित्तावववर्षुः केचि
त्कंसादिदैत्याःकुटिलकुपथगामोहसंभ्रांतचित्ताविद्वेषंजग्मुरेतज्जयतिभगवतश्चित्र
लीलायितंवै॥ ३३॥ जयतिसभगवानरिष्टगेहेत्रिभुवनपालकपालकःकृपालुः॥ विलु

12 13 यमक

13

लितललितालकालिशालीसुचकितवीक्षणवीक्षितःपितृभ्यां॥ ३४॥ अतीवललितालकंस्वजन
पालकंबालकंसुहास्यरुचिराननंकरसरोरुहाभ्यांपिता॥ भयाद्विवयमंसकेरिपुवरस्पत्नीग्रिय
योनिधाययमुनांतिकंममनस्यसोद्यंभते॥ ३५॥ अरुणारुणकिरणोज्वलसुंदरचरणारविंद
मकरंदं॥ यमुनानिपीयमोदाद्दिधाभवत्तंनमामिपदुनायं॥ ३६॥ शैगरिस्तुसीमंतजितःश्रियंता
मुत्तीर्यतस्यांनिशिनंदपल्लीं॥ यशोमतःपूर्वमरिष्टगेहजांनिगतांनोमिहरेश्वमायां॥ ३७॥ अ
थतत्रनिधायबालकंनिजमुत्थसुतामुदारधीः॥ प्रययोप्रतिबंधमंदिरंत्वारणंतंकरवाणि
रररजं॥ ३८॥ तदावितर्ण्यकन्यकांचरान्नृपस्यसन्निधौ॥ निवेदयांबभूविरेयदिछयाजमस्य

॥ मृत॥

३ वसन्ततिलका
स्रग्धरा
पुष्पिताग्रा
४ पृथ्वी
आर्या कल्पना
अनाकलनीय इंद्रवज्रा
वृत्त जमत नाही
स स ज गु

॥ हुल्ली० ॥
॥ २ ॥

श्लो. ॥ १९ ॥ हंसति दूतकदंबे रवलावतंसं कृपाणधृक् कंसः । यन्मायामोहितधीः कारागृहमविशत्सुमस्तं वे । २० ॥ केरधृसाकन्यांस्वसमृदुकराः पाणिमुद्गीतिविलायामास्फालेगगनगर्भमुदस्यसुमेरुं ॥ सुरविनसोमुरूकावददर्पा चिदानंदविषयं महद्येनीवाभवतिचिपदं तज्ञानमकुर २१ । गगनांगणदीपिकाभयसामदपांगामृतवीक्षणेनदेवी ॥ पृथिवीतलकलधमानद्भुजाविशतां मेहृदये गदाग्रजंतसः । २२ । गद्यं । श्रीमत्सुत्रविज्ञातकीर्तिमंडलां ॥ अखंडमार्तंडमंडलोद्दंडकनिजोत्तुंगांगरमणीयाच्छकांतिच्छटाटोपपूरितदिगंतरालां ॥ तुच्छीकृतगरुणकमलोदरकमलातिसुंदरचरणतलां । शारदपार्वणेंदुसुंदरवदनारविंदमंदहासामंदमरंदधवल

६

किरणनिश्चिताधरकिसलयरागनिर्जितपद्मरागां । भुजाष्टकसंगृहीतंकुशापाशासवरदासनचं द्रहासादिप्रहरणछेदितछिजनगरिष्टंदविषयरागां । तडिद्रूपेणविराजमानांगकांतिभंगां । सुमः शाक्तिसुतुंगां ॥ २३ ॥ यल्लीलयालोककृपः सुरावेश्विंतदुरंताऽभवदोग्रसेनेः तस्यावचः श्रोतुरकामकामानः स्यामः क्रियान्नः कुशलानि दीर्घ । २४ ॥ आगत्यसोधमुरुगायगुणाभिमुकंवाकंयदीयगुरुवाक्यभिनोदितंसः । चाणूरमुष्टिकमुखेरकनोकुमंत्रं श्रुण्वन्नृपात्तुभवनात्कसत्रधारः । २५ ॥ तस्यकर्णकुमंत्रयंत्रितास्तंत्रमेकमितियज्ञनाकंसस्यभक्तसुहृदामचीकरन्नसोयमामकृचित्रातांमनांसिनः । २६ । नक्तंदिनमपिकंसोहरिमे

वाचिंतयद्यथाकीटः॥ यमलिंद्वभालोमंपाया मायानिरकस्वरूपीमां॥२७॥ नंदोपिनंदनजन्मिशुभ्र
राप्तनंदो गोदानपानपरमान्नपुरःसराणि। कृत्यानिकृत्यविद्वान्समस्तकामश्रेयोऽर्केसपातु
यदमंगलवारणार्थी॥२८॥ सुतजन्मनिजातवेपथुःपरमानंदसुबंधुरासती। ललनादधिदु
ग्धशोभनायदत्तान्नार्थमभूषयत्स्तनः॥२९॥ लक्ष्मीकांतदिगंतदांतरूपमात्तद्दास्ततोपिस्फुर
त्कांतिभ्रांतिविवर्जितात्पजानुयुगलीलालसत्प्रायनः॥ गोपीगोपसुरत्नधेनुपरिपूर्णायस
मंतात्कुलद्वारिद्धोजयतांव्रजःसुरामंदानंगरस्यरंगाकृतिः॥३०॥ उत्तुंगरंगनिजमंदिरमंद
रस्थोनंदोहरिस्तनुचनेत्यघकंजरान्तः॥ दूरीकरोतुनिजबालककेलिलीलालापातिखेल

नसुलालनकुतूहलेन॥३१॥ पायादपायादलकालिनोभीबालोहरिःकुंडलगंडवाली॥ यन्मु
ग्धहासामलवाक्यलेशा द्रोप्योजकुःसद्मनिकार्यजातं॥३२॥ जयनितांतःकरणंतरुण
यहीस्वसंबभक्वेति॥ जयतिहेरस्ताच्चित्रबाल्यंतदपिच्छगुच्छकास्यस्य॥३३॥ अभिनवकमनीये
हास्यलेशैर्विलासैर्जितकमलविकासैर्लोचनोत्थैःकटाक्षैः॥ मधुरमधुरसालैर्मुग्धवाक्यै
र्जनानांमनसिससुदितोसौनःसपायादपायात्॥३४॥ जयंतिश्रीपदांभोजानरवरास्वरू
णारुणाः॥ अंगणेरिंगमाणस्यहरेर्मणिगणाइव॥३५॥ नंदांगणस्फटिकभूमिगतस्यपा
दौकृष्णस्यनस्वसर्वकौतुकतसनस्य॥ से[illegible]रेजतुःसुभगमंदसमीरवेगनृत्यत्स्वलस्वच्छकम

वसन्ततिलका
वियोगिनी
शार्दूलविक्रीडित
वसन्ततिलका
इन्द्रवज्रा
मालिनी
अनुष्टुप्
वसन्ततिलका

॥ह०ली०॥
॥५॥

अभिसारसानुकूल वृत्त आणि वर्णरचना.

॥मूल॥

लम्प्रतिभाहरेरेतौ॥ २६॥ जयंतिहरिमस्तकेमृदुलनीलनीलालकाःसुगंधजलमज्जनाल्मधुरलोल
लीलाकराः॥सुमंजुलतरगुंजिकाकरविलीमुखानांगणाःसुनीलकमलोपरिप्रचलचारुली
लाइव॥ २७॥ बालमुकुंदमुखेंदुगगनंदुर्वीस्थिपिचास्मितोमननि किंचित्तछायेछुनासायांज
यतिमौक्तिकव्याजात्॥ २८॥ व्रजपतिर्यदनुग्रहतोयमधुपुरीकरदोसुरराङ्भिया श्रि
यस्कदस्यसखानकदुंदुभिःसुवचनंसमुवाचसनोवतु॥ २९॥ ततस्तुकंसायकरंसमर्प्यध्या
यन्वचःसख्युरयंभयार्तः गोपैःसमं यत्कृपया सनोभिर्ययौव्रजंसोवतुकैटभारिः॥ ३०॥
पूतनाव्रजमुपेत्यसैसैबालकायविषयुक्स्तनंददौ सामभारहरिवैरिणीभृत्त्वांश्रीहरेर्ज

तस्क्षणं॥

१०

यतितच्चरित्रकं॥ ३१॥ असंभ्रान्त्यस्तनमाकलय्यसुभृत्त्वांप्राणैःसमं यःपिबन्दत्तास्यैनिजस्स
दंमधुरिपुःकेवलंस्थतस्यास्तनौ॥ प्रायाछ्रीव्रजसुंदरीभिरभितोव्यालोकितःसंभ्रमात्सोयं
नःकृतकिल्बिषानहुदिनंदीनानपाय्याद्धरिः॥ ३२॥ गद्यं॥ अतिसुललितनीलालकगुंफित
मल्लिकाजालिजालिकाभ्रमद्भ्रमरकलगुंजिकामोहितव्रजवधूनिकरा॥ रणरणायमाग्न
मणिकंकणमणिबंधधरा॥ बंधुरकुचद्वंद्वनिविडकंचुकांतर्विराजमानचुचुकश्रीनिकरा॥ क
रकंजोद्धृतकुंजकुसुमपुंजा॥ कांतसुकृतपुंजा। मंजुलांगमाधवांगसंगविरचितपापभंगा
व्रजागतनंदादिगोपदग्धमहद्देहंपरित्यज्यस्वीकृतनिजरंगा॥ कौतुकावलोकनैस्त्यापितज
वि॥

दोन टीपा
१ | शिखरिणी
वृत्त कळले नाही.
द्रुतविलम्बित॥

शेवटचे चरण कळले
नाही.

माध्यम ५ | धारिणी
पूतनेच्या सांडुयाचें
वर्णन
१०॥५॥

6

॥ हं०ली० ॥
॥६॥

६३

ना॥ जयतिपूतना॥४३॥ ओ स्थानिके कर्मणि वासुदेवो विलोक्य सर्वान्कृत संभ्रमान्यः उत्क्षिप्य पादेन शकटं स्तनार्थी न्यपातयत्सो वतु मंगलाढ्यः॥४४ तृणावर्तो दैत्य सर्वः समुपागमत्सुहृदं भजन्वात्सल्य स्वं व्रजमपि स्वोंधं विरचयन्। यसुद्धृत्याकाशे गत ... भ्रमयतां रुज्जो हर्षारं तं शरणमिह कुर्वे स्वल्पहं॥४५ आगस्त तत्र गर्गः सुकृत सुवर्णे तु नामकर्म ययो॥ कृष्णो बल इत्यकरोज्जयत सो गुरुर्यशो ब्रजावासो॥४६ अंक ... स्य मातुः पीतस्तन्यस्य जृंभमाणस्य॥ वदनबिलांतर्वर्ती जयति ब्रह्मांड पिंडक द्वामदः॥४७॥ जितनीलकमल कांतेर्जयति हरेर्वीक्ष्य मुख कुहरे॥ ब्रह्मांडं चतया तं किमिदं किमिदं स्मयस्त्वयं मातुः॥४८

हरिः॥

गवा॥ एवं तत्र तत्र विचित्र सत्र मित्रामित्र प्राणहरणपरौ ... वपि खलाखल निग्रहानुग्रहा धर्म ग्रेसरतद्धर्मे तन्मार्ध्यमानौ॥ अतएव धर्माधर्मसेतुधूमकेतु वद्विराजमानौ॥ नंदयशोदादि सकलगोपगोपी पूर्वपुण्यपुंजाविव सुमंजुतरसुंदर कुजाटवी विहारो॥ अतिरुचिरतरतरुवीरुधा ... तिविपुल भागधेयसूचकाविव ... कृता छगुच्छ हारौ॥ कांचित्कुंजगपरिसंक्षिप्तचमत्कृतचंद्रकस्फुरच्चूडांकुरौ॥ धातुप्रवाल रंजन गुंजा पुंज धारणविस्मापितामर वनचरकिन्नरादिभिः सप्रेमगद्गदकृत पादप्रणामौ॥ कचिन्मृत्संगविराजमानांगकांतिभंगभंगितननिजभवसंगावर्धित ... णाभिरामौ॥ रेजतुः कृष्णबलरामौ॥४९॥ कौमारलालित्यरतस्य

॥ मृत ॥
११
शिखरिणी

१२

विष्णोर्ध्वजाब्जवज्रांकितपादभूता ॥ श्रीगोकुलाधारधरिंसिचभूमिर्हरेस्त्वधंसंप्रतिमामकानां ॥ ५०
यत्रोदातदाबालबाक्येनयस्यमृदाग्लिभवक्रेयथापूर्वमेवस्तत् ॥ हरिस्तत्स्वयोधंसमीक्ष्यास
मन्तुःप्रकुर्वन्भ्रमंनःसपायादपायात् ॥ ५१ ॥ गद्यं ॥ अथकदाचित्सैरंध्रीष्वन्यकृत्यरंधान्वेष
णपरासुस्वयमेवनंदपत्नीदधिमंथनमकरोत् ॥ तदैवजागरन्निबालोपिक्षुधितआसीत् ॥ ज
नन्यपियत्किंचित्स्तनंपाययित्वान्यकृतिकुशलाभवत् ॥ ५२ ॥ तदा ॥ पुनस्तनार्थीदधिमंथ
भांडंप्रस्फोटयदंडेनसमर्कबालान् ॥ दत्वास्वयंगव्यमभक्षयद्यस्तंनोग्निमात्राकृतदामवं
धं ॥ ५३ ॥ तत्राप्यमोचयद्यःकुबेरसूनूतरुस्वरूपौनां ॥ नारदशापादपिनोत्युन्नतयम्ल

स्फोटदत्तुनटराजः ॥ ५४ ॥ वृंदावनंवीक्ष्यसपुष्पवृक्षंलीलेच्छयायःसुकुमारवेषः ॥ न्यवीगवि
न्नंदसुनंदगोपैर्वदेमुकुंदंतमहंभवार्त्यै ॥ ५५ ॥ तत्राव्योऽसृणवीरुधामपिमहाभागस्यरूपो
रूपंस्वलंहत्वानंदयतिस्मयःस्वसुहृदस्तंनोमिनंदात्मजं ॥ ५६ ॥ कदाचिद्धकृतत्रहलाकृपालुः
निर्जैःसाकंकोमललोलनीलकमलश्रीलुण्ठदङ्गोचालयन् ॥ गायन्वेणुरवेणवत्सगतदुर्बलास्त
स्वकीयानमूनसंकटान्मोचयित्वा ॥ कलंवेणुगीतंमकुर्वन्वनेयःप्रसन्नाननोनःसपायादपाया
त् ॥ ५७ ॥ गद्यं ॥ अथकदाचित्पूर्णकामोप्यपूर्णकामइवघनश्यामःपूरयितुंकामं ॥ स्वमनस्यो
पेंदीयरत्नांगवामं ॥ वयस्यैःसमंनीरंध्रसुच्छादितस्फटिकमणिव्रातटोपघटितकपाटःप्रवि

रूपांतर्गृहंतमःस्वधामं । निरीथसुहीस्थसकलजनारामं । स्वकरस्थितप्रपंचचमत्कारश्चौर्यमाक-
रोद्धरिनामयथार्थमभिरामं ॥५८॥ निशीथेनिद्राणेसकलजनसंघेव्रजसुतैःसमंगव्यंनव्यंप्रति
गृहमसौशिक्यलसितं ॥ क्वचित्सुकापीत्याक्वचिदपिचदत्त्वालककभेदसमुल्लोलहिंदुःसदवन
सुबिंदुर्विजयते ॥५९॥ प्रतिसदनममुष्यचौर्यमासीदितिकुवितर्कसुकर्कशैर्जनैर्यतः ॥ निग-
दितमपियस्यकिंततःस्याद्धितरलुनःशममीश्वराईउयलीलः ॥६०॥ चौर्यत्र्यस्तसमस्तमस्त-
कलसस्सुन्यस्तगव्यामृतश्चोदंचद्धटद्वंदमाप्यसुयमुनातीरेपिनीरेहसन् । त्वलागोपतिबा-
लकैःसहपिबन्तुंगरंगाकुलंक्रीडन्यात्त्वलादशौमधुरिपुर्गोपालगोपालकः ॥६१॥ दे-

शेषिकंदुकमितिभवदन्तकरेणधृत्वाकुचंचनवनीतधियाद्वितीयं । आलिंग्यनीलकमलोपमलो-
चनायाःपायादनंगभरमंगमसौसदानः ॥६२॥ एवंतदीयचरितेरतिदुःखितास्तानंदांगना
निकटमेत्यजगुःसमेत्य । तावद्धरिःस्वयमुपेत्यसधूर्तराजस्तस्याःसदंकविलसन्नवता-
सदानः ॥६३॥ अधुनंदोहितमवदद्वृंदावनमांविनात्वमितियुक्त्या ॥ यःश्रुत्वागोगोपैर्गता-
ऽघमहनदसौनिजानवतु ॥६४॥ हृद्राजगरंवपुर्वहन्नघनामासुरव्रात्तुराक्रमन् । व्रजजना-
वकद्वंदमुद्धृतानिजलोकानवतात्सनंदजः ॥६५॥ येनसवलसद्धुमंकुसुमगुच्छतुच्छीकृतस्व-
पांथ्यपरिखेदपूरमनुपूरयते । सयः ॥ लक्कौ व्रजसुतैःसमंगगनचुंबिवेणुस्वनःसनःसुख-

॥ हं॰ली॰॥
॥ २॥

तदर्शनःसुलघुकाममाघः पुमान् ॥ ६६॥ ब्रह्मापियस्यकुतुकायसमेत्यवत्सान्गोपालसंघमनव
घमनूनुरस्सः ॥ तावत्तयैवतदयात्तसमस्तवेषतन्मात्रमोऽह्रुदलीन्स्यतुमेत्ययवर्वान् ६८॥
विधिरेत्ययचरितमीस्पदआबकुदर्पणेकलुषबिंबमिव ॥ अतुकृष्णमास्सतनुगोपैं ... प्रण
मणुमः४ नामतस्यचरणै ॥ ... ६८ गद्यं नमःप्रचुरतरसुरासुरनरकिंनरवरमुकुटकोटितट
घटितमहार्हमणिगणरंजनकृतभयभंजननिजजनरंजनचरणाय ॥ विकलीकृतसकल
जनकलाकलापसुररिपुहरणाय ॥ तर्जितजनकवगर्जितसुदमावर्जितनिजजनवद्रि
पुहरणाय ॥ प्रतिगृहकृतचौर्यसंपादितदधिदुग्धनवनीतबिंदुविचित्रितनवीनपीतांबरवि
लसितगात्रतेकोभाभरणाय ॥ रमारमणाय ॥ ६९ ॥ प्रणम्ययस्यपादाब्जलब्ध्वास्वाराज्यसंपदं
सत्यलोकमगात्ब्रह्मासोयंजयतिमेहृदि ॥ ७० ॥ आवर्धविधिलोकेगेर्गगसुतैःसंगस्यगसंतरा
प्तैःसीमकृपाकटाक्षसुधयासंस्नापितैःकोमलैः ॥ कालिंदीमृदुलाछबालुकलसत्कूलेच
लन्मारुतेलोकेपिन्यचदुदारपद्मनिकरेक्रीडन्हरिःपातुनः ॥ ७१ ॥ स्वंस्वंविमुच्यलघुत्रिकामि
मेगृहीतास्वाहन्तवारुकवलान्प्रददुर्मुखेभ्यः ॥ केचिद्विहस्यजगरकुःपरत्रिकामेकेदूरेजकुर्जे
यतितस्सुकृतंग्रजस्य ॥ ७२ ॥ गावोपिचेरुस्तृणचारुतीरेबालाविजह्रुर्यमुनाछनीरे ॥ नी
रेपितीरेपुलिलस्यपारेसंसारसारेमतिरस्तुकोरे ॥ ७३ तत्राभूदघदैत्यस्यचर्मखेलनकं

मूल
१७ वसन्ततिलका
मुस्तः वृत्त लागत नाही

१८
शार्दूलविक्रीडित
वसन्ततिलका
इन्द्रवज्रा
वृत्त लागले नाही.

॥ह०ली०॥
॥१०॥

धेनुकासुरवधः

दरं॥ स्खलोप्यगच्छन्मुनिंसपक्षपयातंनमाम्यहं॥७४॥ तालाटव्यांभव्यवेषैर्वयस्यैर्गत्वानालान्
कंपयित्वाफलानि॥ भुक्त्वापीत्वारासभंधेनुकाख्यंहत्वाक्रीडन्नःसपायादपायात्॥७५
हरिणाघनामदेसःप्रणादितोधितिवसरांतेपि॥ जगदुर्जेजेनुबालाःसदिदंचित्रंचरित्रम
यतान्नः॥७६॥ कालियाहिविषदूषितैर्जलं यामुनंखसुहृदंसमीक्ष्ययः तस्यदोषम
नैषतनु च तःसंजीवनामकुनालंकरोत्सो॥७७॥ निपीयतद्देवस्यगारविसुतातटे
ताव्यसः महद्बकुमसारेमज्जनुतेःसमंकालिये॥ निपीडयितुमुद्यतःप्रचुरतांडवाडं
बरःप्रविरपडात्कमार्दितःसुजनसत्कृतःपातुनः॥७८॥ कृतनर्तन [illegible] रसकतुकःकालि

यभोगालि [illegible] लमृदुचरणः॥ कमलवनीमकरंदेबंधुरचरितालिसुंदरोजयति॥७९॥ कृ
ष्णाहिदूषितांकृष्णांकृष्णःकृष्णासरस्तोमम॥ अकृष्णाँविन स्यासो तृष्णांपूरयतुप्रभुः॥८०
श्रीष्मोनामऋतुर्वसंतइववसरंतुस्कोकिलालीकलध्वानैःषट्पदकूजितैःसुनयसांगीतैरद
भैर्हरेः॥ वृक्षाणांनवपल्लवैश्चकुसुमैर्मिष्टैःफलैर्भक्तिमानूछायाभिश्चसुप्रीतलाभिरगम
त्सेवांकृतेसान्निव॥८१॥ ततोहरेःक्रीडनयेणुनादःसंगीतलालित्यकलाकलापः॥ निजांप्र
सांमंचकृतांतरूपोजयसरंकामकलाप्रवीणः॥८२॥ तदातत्रमित्रैःसमंदेवलुकालिप्रलं
बाख्यदैत्यंस्वमित्रस्वरूपं॥ जहावात्मकार्पण्यदोषंमदीयंनिहन्यात्सदासस्यकस्यात्

॥प्रता॥
१८ शालिनी
२०

धेकानुप्रास

२१स्था। ३णत्त २८ २५७ २०३० दश॥ नाही

छेकानुप्रास

॥मृत॥

कारी ८३ यमुनानिकटे बकुदूरगतान्‌ दमुनाविदहन्नुगिलितः कलितः अमुनासुरनायकले
कगतश्चकितश्चकितो जयते सुरयः ८४ वर्षतो जलदाः समेत्य गगने वंचत्तडिद्गंजनैः प्रोदेद्ध
रिसुवारिपूरमभितो संसानिलैर्वेपिताः वर्षतस्तु सरित्प्रवाहलहरीसंश्लेषमाधन्महाकूपा
राः परिवारितार्ककिरणास्तापाग्निसुसंतुनः ८५ पांथानाकुलयत्सलंककलरवैर्मत्तं मयूरा
सन्नृत्यद्वृंदममंदफुल्लकुसुमाः कुंदाहसंतीवतान्‌ कुद्धानंगनृपालसैन्यमिव दुर्धर्षायनानां
घटागर्जत्तीपरितर्जयत्यलमिदं कुर्याद्धि भूमंडलं ८६ कृत्रिममंदिरसुंदरलीलावल्याः कु
चौ समाश्लिष्य मन्यंते दुर्दिनमपि सुदिनं कृतिनो जयत्विदं भाग्यं ८७॥ जले विलातलेब

२१

दीपकी उपमा

लेन साकमापयः सुखं॥ जयत्ययं कपार्द्रधीः सुवेणुनादलोलधीः॥८८॥ अनुभवितुं यः शारदं चं
चकरदिंदुबंधुरुल भवदनः॥ बिंबाधरधृतवेणुः प्रविशान्वृंदावनं निजानवतु॥८९॥ निरुद्धस्यन
हृदं निर्मलीभूततोयं विकसितकुमुदं स्वच्छताराधिराजं॥ समुदितलघुशीतं प्रोज्ज्वलत्खंजरीटं
जयति शरदनंगालंकृतिः कामिनीनां॥९०॥ वेणुस्वनेन गोप्यो मोहितचित्ताः कलिंदकन्यायां
गिरिजामपूजयन्यत्कृतकामाः सोयतात्कदंबस्थः॥९१॥ अनूचुरहस्त्रकदंबमासां तत्तदर्थबोधे
कृतात्मकामः॥ स्त्रीचरं नर्मरुदस्यलीलातनोतु कल्याणमभीप्सितं नः॥९२॥ यस्त्विग्ध
वाक्यमधुविश्वसिताः समेत्य सामीप्यमात्तपरिपक्कवरान्नपात्राः॥ संतर्प्य कामममनुतमानि

२२

वस्त्राहरण

॥ हरिलीला ॥
॥ ३२ ॥

॥ मृत ॥

स्मरणान्मदेव पत्न्यर्थमुपगम्य जयंतु गेहं ॥ ९३ ॥ मखत्यागादिंद्रे कृतवति महावृष्टिमभितो निरीक्ष्या
र्त्तं नंदस्य ज्ञानमुदितसलेश्व्रजमयं ॥ नगंधृत्वा गोवर्द्धनमुपरि हस्ताग्रमनिशं सुरक्षन्मालिन्यम
हरतु बुद्धो विलसितं ॥ ९४ ॥ अथ कामधेनुसहितः सुरराडुपगम्य यस्य चरणे प्रणतः ॥ प
यसाभिषेकमकरोत्सुरगो स्तमहं नमामि कृतगोप्रणं ॥ ९५ ॥ नंदं यमुनामयं दृष्ट्वा जलपाल
सदनमुपगम्य ॥ तस्मर्जितपदकमलः सपिता तीरस्थितो हरिः पायात् ॥ ९६ ॥ कृतमुरलीर
वकुलिसमुदितमृगाक्षीसुनाभिहृदतीरे चंचलमभिनवलीलं कंचनरंजनमहं मुदावं
दे ९७ सवबोभगणैर्विलसन्वृंदावनगगनमध्यकृतशोभः ॥ गोपीनयनचकोरीमुदं वि

२३

तन्वन्हिमांशुरभिपायात् ॥ ९८ ॥ यमुनातटकलहंसेनानागोपीमुखारविंदालैः ॥ राधाकु
चदुर्गनृपे हंसीभृंगी प्रियामतिर्मेस्तु ९९ शृंगारांबुधिचंद्रः स्वजननयनाश्रीरनगेंद्रः
सुजनमनोगतिकेंद्रः कल्लोलयतु प्रभुः स कल्याणं ॥ १०० ॥ तातो यस्य महानशेषविदुषां मान्यो
स्ति सद्विठ्ठलो माता यस्य सुरुक्मिणीत्यभिधया ख्याता स्ति यस्यापि च श्रीमद्गोरवदेरिदो
गुरुवरः श्रीविश्वनाथाभिधः सोयं गंगकविः सुमंगलतरं भक्त्युल्लुकः खेलतु १ इति श्रीमद्वि
मणाज्ञया बल्यदेवासुखमवबोधोचितश्रीरुक्मिणीवल्लभसूरिसूनुश्रीमद्विश्वनाथसूरिच्छात्र
वर्यगंगाधरकविभाषितेहरिलीलामृतास्यकाव्ये मंगलांके बाल्यचरित्रवर्णनो नाम प्रथ

२४

मास्वादः ॥ ५ ॥ श्रीमल्ललितांबिकायै परदेवतायै नमः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ 25
श्रीगणेशाय नमः ॥ हरिलीलामृतारव्यस्य काव्यस्य द्वितीयास्वादः प्रारभ्यते ॥ श्रीमद्गोविंद
दासुसुंदरपदपंकजं ममचित्तनिलिंदस्ते स्वादयत्वनिशं मृदु ॥ १ ॥ कालिंदीतीरकुंजे मधुम – ऋतुवर्णनाकरिता दीर्घवृत्ताचा वापर.
दयिलसद्वर्वधन्मृगपुंजे कंजालीधूलिमालामिलनकृतरसैर्बिंदुभूवेसमीरे ॥ इंदीं कुलस्य
बंधोर्मुकुचपलदृशां कामिनीनां स्वमौलिप्रायान्द्वीवारदानः कुसुमशरमहः सेवितः श्री
धरेण ॥ २ ॥ गद्यं ॥ जीयादनुपमतरहिमकरकरपुंजेः क्वचिन्मंजुलतरसमीरसमीरण
प्रचुरतरलतरुलताच्छायाभिश्च विचित्रितं ॥ अत एव सितासितोपलघटितमिवल

२।२८ ऋतुचे वर्णन

26

सितं ॥ क्वचिद्धि कुसुमल्लिकादिलताभिः कृतनर्तनसमय हास्समिव व्याकोचितकुसुमं ॥ कु
सुमपुंजालिभ्रमणैर्विजितमदचटुलमृगाक्षीनयनकुसुमं ॥ समुद्रांगमिव रामालिंगितम
पि रामेश्वराराम ॥ किष्किंधानगरमिव समुदितताराधिराजाभिरामपि सुग्रीवोपभुक्त
मापि कलितांगदभूषणं ॥ कैलासगिरिशृंगमिव समुदंचितनीलकंठगणनृत्यमपि सुमार
पदललितं ॥ क्वचिद्ब्रंधर्वनगरमिव स्वीकृतसंगीतरहस्यमपि दर्शितदेहांतं ॥ दिनमणिकि
रणनिकुरंबमिव प्रकटितभयरहस्यमपि दत्तकामि ॥ घर्मोदकमपि तर्पितद्विजवृंदं ॥ वार
णमिव कृतपथिकभरणं ॥ भागवतमिवाप्रकटीकृतराधारहस्यं ॥ रामायणमिव प्रदर्शित

दृग्रासुखकथानकमपियल्लीकोद्भवरचितपदं ॥ भागतमिवहृष्टार्जुनमप्रमोदमपिकर्णाभिरामम
पिभरव्याप्तधर्ममपिकुलगांगेयाभरणमपिहृतदुर्योधनमपिकृतनकुलन्यादमपिसहृपा
चार्यमपिसंगीतहलधरश्रीहरिपदारविंदं ॥ रंगस्थलमिवनृत्यप्रोपतिवामनयनाजन
स्वीकृतखंजनमपिप्रकीर्णांजनपुंजं वृंदाटवीकुंजं ॥ ३ ॥ चरमार्णवमापन्नेसवितरिकौ
कुलेरथांगरवगे इंदुर्विजयतिगगनेकोनभवेदधिकृतःपदेधन्यः ॥ ४ ॥ प्राचीमुखमनु
रंजयन्स्वकरैर्हिमांशुःकल्हारवृंदमभितोगमयन्विकासं संवर्जयन्रथपदाभिधमेथुना
निजीयाद्विरहयस्सिविहायवियेतराणि ॥ ५ ॥ प्राचींप्रियांवीक्ष्यहिमांशुरक्तांवैराग्यवाली

२८

म

यसहस्रभानुः अस्ताद्रिरंगेविरचय्यपीठं समाधिधीरःकुरुतानिकुर्यात् ॥ ६ ॥ कृष्णेप्रेम्णे स्प
सुखसालवदनकृतस्त्रियार्थ्यमुपनाधिदिवाकृतः संजनानमदनस्यसखासोमोदमाप्सुक
तजयतीदं ॥ ७ ॥ गेहंगेहमभीक्ष्णमुद्गतयतीरोलोच्चयंकाननंवारंवारमकुंचितागतवतीदृष्टंतो
घमुच्चिन्वती निस्यंनित्यमुदंचनंपरिगृताद्रंगास्मातन्वतीकांतेवव्यभिचारिणीसुखक
रीपायादियंकौमुदी ॥ ८ ॥ सप्रसंगं समीक्ष्यवावदाकृतांविपिनवार्द्धिजामीप्सितां रिः
किलकलिंदजातटकुटीरकोणेवसन् ॥ कटीतटसुवर्णपीतपटगुंफितःकामिनीमनोजल
धिचंद्रमाःक्वणितवेणुरस्तांमुदे ॥ ९ ॥ त्रिभंगितननुस्तनंदनलसन्निलेखाकृतिस्तरंगितह

छेकानुप्रास

— श्लेष

॥ हल्लीश ॥
॥ ३५ ॥

पृथ्वी वृत्त

॥ मन ॥

२९

सांभरं कुलितदिककदंबः किसन्॥ हसन्नधरबिंबके धृतसुवंशवंशः कं दारम्पुरीकृतमनुकृति
छवलयः सपायाद्धरिः॥ १० ॥ हरित्तृणनवांकुराग्रानरुतादराधम्मवंदनिपीयमधुराकलं मु
रलिबिंः स्तुतं संजकुः॥ तृणमधुकरामधून्यपि रुकाः पिकाः केकिनः स्वकूजितमिदं मनो
मनपिबत्सरं लालसं॥ ११ निर्वैरमासीत्खलु तत्र चित्रं व्याघ्रः कूलमेणीपरिलेलिहाना त
न्नैव चित्रं भगवत्यनंते क्रीडोत्सुके क्रीडितमेकमेव॥ १२॥ अथ तस्य विधातुमर्चनं तक
भल्पः समलं कृतैः स्वकैः कुसुमैश्च फलैश्च सादरं प्रणतास्तच्चरणे जयंति ता॥ १३
सुरल्लनाः सुमनोभिर्यत्संगिरां तिरल्लमुक्ताश्च॥ तदवसरे मदनशरारोकंपितहृद

— पृथ्वी वृत्त

— इन्द्रवज्रा

→ उपगीति

२५
113

याजयंतिदिविधिलंग्यः॥ १४ ॥ श्रुत्वा वेणुरवं कलं मृगदृशः संगीतगीतांकुरं प्रोत्तुंगस्तनकुं
भसीम्नि विलसद्रोमांकुराः श्रीहरेः॥ कुड्यानंगविलीलकुसैर्विदलिताः संत्रस्तनीव्योगलच्चे
लाश्चित्रसमर्पिताद्व्रजयं सन्नातसुश्रातयः॥ १५॥ तडिच्चपललोचनाः कृतनिकेतनोन्मोच
नाः प्रबद्धरतिराजबाणकृततर्जना बांधवान्॥ प्रहस्य गृहकृत्यमप्यखिलमानभूषावरा
निशिव्रजवधूजना विजितसज्जनाः पांतुनः॥ १६॥ पतिपुत्रबंधुपितृहार्दमपि प्रभुवेणुदत्तम
नसा महिभीः॥ गुरुहीश्चनस्मकुरुतेकिमपित्यधमेतदस्यचरितं जयति॥ १७॥ अरविंद
सुंदरदृशां गमनेरणद्धनूपुरमंजुध्वनितं॥ अभिनीय देवललनाश्चकिता सदिदं व्रजस्य

वीरभद्रऊमार

३० शार्दूल विक्रीडित

— पृथ्वी वृत्त

— वृत्त कळत नाही

— वृत्त कळत नाही

॥ह०ली०॥ ॥१६॥ ॥सूत्र

मालिनी

सुकृतंजयति॥१८॥अनिललितगतीनांसुभ्रुवांवृंदमेतद्घननिकरचिरंचंचकांतिंसौदामनीनां। 31
अघनगगनसंचारकारिणीनांसुदृष्ट्वाभंजयतिममनन्धुरुतर्कदंस्थंविचारो॥१९॥एणीदृशां
वदनचंद्रदृशों...वीक्ष्यनरासासुमौक्तिकमिषेणसमग्रतारा॥एकंकलंकिनमपिक्षयरूप्य — वसन्ततिलका
मेनंसंत्यज्यपूर्णकमतीयतयापिरेजुः॥२०॥एकांगनासंगवलेनकस्त्वंजगज्जयस्यस्तदनं — उपेन्द्रवज्रा।
गकोपि वातागनाभिःप्रबलस्त्विदानींकरोतिकिंचित्रमिदंमुदस्तु॥२१॥श्रीनंदनंदनस
मागमुपेत्यसर्वान्यंचत्तुसारकरकोमलयत्कपद्माः॥तत्संगकौतुकतयाविविधवसनाम्ब — वसन्ततिलका।
तत्त्वरसार्द्रहृदपंजयतामनंगः॥२२॥किमर्थमिहसंगतानिजपतीन्भजध्वंनिर्गम भोव — पृथ्वीवृत्त

दृतिकांगतिहीनमुखपंकजानःसुभ्रुवः॥ समेवउगतोपतिःप्रियइतिभ्रुवंसोवयंसमीक्ष्यतारणा 32
गताःसुकृतवर्धितापरांतुनः॥२३॥इत्थंभ्रुवंतीमुदयासमुद्धःश्रीमन्मुकुंदोवनितासुतासु।
क्रीडोत्सुकानंगकुतूहलेनकुर्वन्ररतंपातुविशालवंशः॥२४॥एणीत्रावविलोचनादरगल — शार्दूलविक्रीडित
द्धेणालसत्केतकस्त्रग्श्रोणि...रालसामलसुधावाणीकृपाणीवसा॥राधानंगनृपस्यवी
निघुरचलद्धाधास्वबोधान्मुधाकृत्वोत्तुंगसदंगसंगमदरंगात्तांमुदेसुंदरी॥२५॥सर्वासुतासुव्र — इन्द्रवज्रा।
जसुंदरीषुराधामुदेभूत्सुरनायकस्य॥ वल्लीःसमस्ताअपिसंविचिन्त्यभुंक्तेमिलिंदोवासिनी
सरागां॥२६॥तारंतुकामाअपिगर्वयुक्ताविलोक्यराधारमणस्तिरोभूत्॥राधापिदूरीकृत — इन्द्रवज्रा

Marginal notes: बीजेची उपमा; हनाच्या दृष्टीने हे शब्द अनावश्यक वाटतो

इथपासून राधेचा उल्लेख आला आहे

॥ ह०ली०॥
॥१७॥

कामबाधाभारब्धमेवात्रजयस्यपारं ॥ २७ ॥ अथतामदनानलेनदग्धाःपदहीनांबुजरुरुघवन्कमा
लाः ॥ अभजन्नहरिमात्तदुर्भ्रमास्तांसजलेंदीवरतुल्यलोचनास्ता ॥ २८ ॥ उत्फुल्लकमलमपिप्रियं
नच्यासीदालोलकमलकुलंचभृंगमाला ॥ कालिंदीजलमपिचंद्रबिंबमासीद्दुःखांद्रमनानि
सुखंचदुःखरूपं ॥ २९ ॥ भ्रमद्भ्रमरभांकृतैरहहकोकिलाकूजितैरदभ्रमदनावलीमणिन्मन्य
स्यबाणोपमैः ॥ नवांकुरसरद्भैःसुरभिभिःप्रसूनैरिदंवनंकलितस्सहनंबलमिवाबलाःकं
तति ॥ ३० ॥ आनीलनवमभिनःस्थितंतमालंश्रीखंडंविपिनमथाम्रकेतकादीन् ॥ दृष्ट्वासोम
दनविलोललोचनास्ताःकालिंदीतटमिदमेसमंजगुस्ते ॥ ३१ ॥ अयेसुरतनाथतेवरणचेटि

कापेटिकारहस्यपरिपाहिनश्चटुलवीटिकाःस्वीकुरु ॥ अपारतिरुजरारुजरसआविरासां
मुहुस्त्विदंककरुणाजयितंमगदत्वांसमुजृंभतां ॥ ३२ ॥ उद्दंडदंडधरदुर्धरचंडमारझंकारभारदरदा
रितकोमलांगीः ॥ रक्तांकुरंगितविघूर्णितलोचनास्ताजीयाद्गुरिःस्वकृपयासुधयाविलासी ॥ ३३ ॥
तमालनीलंमृदुनीलवालंश्रीनंदबालंवनिताविलोलं ॥ गतंप्रियंप्राणमियागतंताःस्त्रियं ॥ आ
रात्करूपंतुमोदं ॥ ३४ ॥ चुंबंतीमुखकुसुमंस्तकमल्लारमणस्पर्धीटिकासुरसं ॥ मदनाघूर्णितनय
नाततनुत्रापनेवमोहमपहरतु ॥ ३५ ॥ कांचनकांचनभूषांकृतहरितोषांविचित्रधृतवेषां ॥ कं
ठालिंगनपोषांप्रणमततोषांतरस्तनवयोषां ॥ ३६ ॥ मंजुलवंजुलकुंजेकलगुंजाकरमिलिंदि

33 कृष्णागमनवार्ता

34

३४

वर्णानुप्रास
छेकानुप्रास

छेकानुप्रास

18

कापुंजे॥ विरचितगुंजापुंजेगोपतमालेमुदेस्तुपरंपती॥३९॥ काचिद्गोपतिनंदनचंदनमालिंग्य
गोपिकालतिका॥ मदनघनानलसंज्वरस्तुस्संतीपुष्पितेवजयतितदा॥४०॥ विजयतिहरितनु
संगात्कान्चिदनंगांगदाऽगदागोपी॥ निबिडांबुदांतरंगे चलछटान्वंचलेवतन्वंगी॥४१॥ रासासक्त
मनाःस्वयंप्रभुरपिस्वकरपुष्पसंतर्पितरत्नासायावदभ्रकंदंबकमंतावद्दधानमानः॥ कुंजेको
मलनागवल्लेमरवधूःसंमोहयन्वेणुनाजीयान्मंगलकारुसंतांमतिपतिश्रीनंदगोपालजः॥५०॥ग
द्यं॥ श्रीमद्गोपतिगोपिगोवत्ससुभगचरणमंजुरणन्मंजुमंजीरध्वनिपुंजीभवत्कलहंसं॥क
लहंसायितभक्तजनमानसमानसं॥ विकचकुसुमपरागपरंपरापरिमललुब्धषट्पदक

35 शृंगारीक

लगुंजानुरंजनशोभमानस्थलविशेषं॥ निःशेषच्युतधैर्यतयाशिथिलजघनदुकूलस्खलना
विरचितगानरहस्यविशेषं॥ गोपीभिःस्वीकृतविचित्रवेषं॥ क्वचिन्मृदंगवीणादिवाद्यसंपद्य
मानगद्यपद्यं॥ परमहृद्यं॥ परमसुंदरतरकुंदरदनगोविंदवृंदसमगोपिवृंदनृत्यसंगीतलीलं
जयतिरासमंडलं॥४१॥ द्वयोर्गोपीद्वयोर्गोपीत्येवमाकल्प्यमंडलं॥ वादयन्मुरलींमध्येरममा
णोमुदेस्तुनः॥४२॥ मुदेस्तुकरभननंदगरविंदसंमीलनंनितंबलघुचालनंहसितरोचिरव्यं
चलं॥ चलंचकुचकंपनंतनुलतामतांदोलनंकपोतरवकूजितंमृगदृशांरणन्नूपुरं॥४३॥ वृं
दावनोपकंठकदंबकभ्रमिरामाभेणीदृशांचकितलोचनजैःकटाक्षैः॥ श्रीमच्छचीपतिमणि

36

प्रकेरेरंदमंपूर्णवभान्तिपरिपूर्णहेत्राममनस्तु॥४४॥सुभगपवनलीलालोलवल्लीप्रवालछवि
हरसुरगारिम्राणनाथस्यचारु॥ वितरतुमुदमाराल्लस्तकांचीगुणानांरुचिरकटसरोजाद्
न्ननंसुंदरीणां॥४५॥ दरुन्मीलनंपातुमदालसानांलावण्यघूर्णन्नयनारिकानां॥ महार्हपल्ल
वृत्तलेस्वराजरत्नालित्रोभाजिदनेकभावं॥४६॥ आंदोलनंश्रीअंगसुंदरीणांनितंबबिंब
स्यमुदंतनोतु॥ सुवर्णरत्नाकलितेचदोलाश्रीमीनकेतोर्महतेमहाय॥४७॥ गोपांगनानां
स्मितमातनोतुकल्याणमव्याहतमर्जितोषं॥ मुक्ताफलंविद्रुमसंस्थमानजहासयत्पल्ल
वगंचपुष्पं॥४८॥ वासांसितासांरुचिराणिकृष्णाद्दीसेवलोलानिजयंत्यतृष्णात्॥ प

— ३७ पृथ्वी वृत्त

३८

चौर्यवक्रानिपयोदकृष्णात्पूर्वंकदंबेस्त्तभक्ततृष्णात्॥४९॥ अभिनवकदंबकानांस्तबका
इवचित्रवस्त्रविछन्नाः॥ जांबूनदवर्णानांरमणीनांदंजपंतुकुचकुंभाः॥५०॥ विरचयन्मदनर्त
नकौतुकंमगदत्रांकुचद्वंद्वमिवादरात्॥ हरिरिवामणिदर्पनलोभितास्थपटारब्धमुगावलिरा
वभौ॥५१॥ नंदात्मजमभिषेक्तुंसुवर्णघटद्वंद्वमादरान्विचितं॥ रतिपतिनेवमृगाक्षीकुचनिकु
रंबंनःसंमुदेभवतु॥५२॥ जयंतितनुसल्लतास्तरुणसत्कृतामंडलेसमुच्छ्रितविभ्रमाःप्रवृ
ढगर्वखर्वश्रमाः॥ अकांडजलदांतरेप्रचुरलोलताडंबराःप्रखंडिततदंतराद्भुततडिल्लताः
काननेषु॥५३॥ कपोतरवमाधुरीकलितसाधुरीतिर्जयत्यनंगनृपतेरियंकमललोचनानांमु

— ५३ पृथ्वी

वोर्वची ३४ nr

सुरुचिभरणीगेहिमानसमदीयस्खेव॥५९॥ गतमायारागैर्विगलितमदद्रोभवनवभैवाशी
म्लानोराजागलित्तविभवोभूदिवनभः॥सरःकुंचसम्भ्रमगथारहितंनैवत्क्वसन्निभप्रभातंसं
जातंनयमिवसमुज्जृंभतइदं॥६०॥ अथप्रभातेसार्विसंघसंवृतःसुरेयनगोवंद्युतोरमा
पतिः॥कलिंदकन्यातटमेसमादरंउपःसुरेयच्छुदलयसमंगलं॥६१॥ दिनमणिंदयितं
प्रसमीक्ष्यसारसयुनैवजयस्यापिपूर्वदिक्॥कमलिनीमलिनैवसपत्निकाविकसिता
करपल्लवरंजिता॥६२॥प्राचीनगंधपरिमेदुरवायुवृंदनोयातिसुप्तकुमुदांतरियप्र
लीनं॥प्रातःसजृंभणसरोजवनादमीतुयातांकुराःसमुदितगइवमोदयंतु॥६३॥बा

४० शिखरिणी

निसर्गवर्णन

॥ ह०ली०॥
॥२०॥

॥म्रत॥

कुःसुबंधुरघनस्तनस्तभ्र्युकंकुलीनामिवमवर्द्धयन्तुमंगलंस्वलितमंभ्रयणाबलि॥५४॥च
लन्मंजुमंजीरपुंजध्वनीनांसुधास्वादमाधुर्यधाराधराणां॥समीक्ष्यालयःसंजकुर्गुंजितंत
च्चरित्रंविचित्रंपवित्रंमुदेस्तु॥५५॥अतिमंजुलगीतमाधुरीश्रवणेनास्तमितस्वराकोकि॥म
विटपेषुवसंतआदरस्तुनयोयोगपराइवाबभुः॥५६॥मृदुलांगवदंगसंगिनीरसरंगाप
रिणाद्विभंगिनी॥तरुणीव नवीनसंगिनीमुदितामोदयतुमवाल्लिनी॥५७॥ झर्झरसल्ल
रिकिंकिणिडिंडिमघटवृंदडमरूतालानां॥झंकारेणापूर्णंविपिनंमुदमातनोतुनृत्यदिव
५८॥अनुनृत्यवेणुमुदितंसकलंमृदुनृत्यगानकुतुकंसकलं॥ध्वनिभिस्सरीतिविधिव

३८

- क्रमभङ्ग,
- विविध वाद्यांचा ध्वनी.

लातपेन पृथिवीनिचितेव भाति रक्तैर्मणीन्द्रनिकरैर्यमुनातटस्य पा प्रभानिकरविस्फुरणेन नीलरक्तेन रंजितमिव मददात्तुभं ॥ ६४ ॥ रवेरुदयरोचिषा निबिडचर्चितान्वया मरकतकाननलसच्छविप्रचुरचातुरीहारिणा। हरेर्जयति सुंदरी तनुरनुमदो घनासलीलजलरंजितागगनगेधकादंबिनी ॥ ६५ ॥ आखंडलदिक्कुंडमिदमिव मार्तंडमंडलं जयति ॥ इदमपि परिहृतविभयं रात्रिबिंबं नृपतिमंडलं सादिवा ॥ ६६ ॥ रचिरयमयमस्मिन्नुष्करेर्व र्वरीतिप्रचुरकलितपापस्तापमेति दूरेषः ॥ इदमिदमुपकंठे लोकवृंदं समंताद्व्रजतनिजगृहाणीति ब्रुवन् पात्वधीशः ॥ ६७ ॥ आलप्ताहरिणा गणैवमदनेनाक्रांत

चित्तालसाः प्रातः सांद्रतदीयमुग्धचरितान्यालापयंत्यश्च ताः ॥ मंदं मंदममंदकुल्लकमलस्मेननागोकुलं मैत्रवक्त्रेदकणार्द्रिताः प्रचलिता गोप्योऽनुदेस्तंतुनः ॥ ६८ ॥ एवं रासे गीतनृत्यादि हासैर्लब्धानंदं नंदसूनोः प्रकाशात् ॥ गोप्यो गत्वा गोकुलं नंदिसगणिगायंत्यस्तं पांतु लोकं पुनानाः ॥ ६९ ॥ ततः सगोमनोहरिर्वनाद्व्रजं सुहृद्वृतः ॥ समेत्य पूर्ववत्सुखं भजन्पुनात्तु मामकान् ॥ ७० ॥ पर्वण्यंबावने सर्पसंदष्टं पितरं स्वयं तत् ॥ सर्पेण संस्तुतः पायादपायादनिशं हरिः ॥ ७१ ॥ खेलं च्छीघ्रजसुंदरीभिरभितो गोपालवृंदैः समं श्रीमच्छीरकरेणदुग्धनिवहं तं शंखचूडादिकं ॥ वैकुंठाधिपतिर्हरन्व्रजमनेकाव्रीर्युतं रंजयन्पायान्नीकगलाभिपूजितपदः सद्वृंदाचूड

॥ हल्ली॰॥
॥ २३॥

वर्णानुप्रास

॥ सूत॥
४३

मणिः॥७२॥ पिष्ठातु दुष्टं हरिरप्यदुष्टं तत्सिरमादाय निगेर धृष्टं उदूर्ध्वकृष्टं विरचय्य तुष्टं पु
ष्पंच लोकं परिपालकष्टं ॥७३॥ व्योमासुरमपि केशिनमहन्नसोयं पुनातु रुक्मिणीभर्ता॥ यस्य
कुसुम सुतनु साभीतस्फीतस्मितः कृष्णः॥७४॥ अक्रूरमालोक्य विशालबुद्धिं प्रणम्य
पादौ च तदीयकोयः तत्कल्पभादभिनीय यथ नंदसूनुरिपोः पातु हरिः सदानः॥७५॥ उ
षसि स्वरथे कृष्णं निधाय मार्गेण गोकुलं पश्यन् सबलं यमुनानिकटं गच्छन्नक्रूरकःपा
यात्॥७६॥ अक्रूरमुद्वीक्ष्य हरिं नयंतं गोपांगनाः क्रूरतरं विविच्य॥ यस्मात्स रः क्रूरं
हैयनास्ती स कृष्णात्तु युक्त्या शिथिलाः पुनंतु॥७७॥ शृण्वन्गीतं कामिनीनां मुखेभ्यः

४४

पश्यन्मूर्तीर्देवयोः स्यंदनेसः॥ कुर्वन्गाथां कंसनिर्याणकर्मी मक्रूरं स्वांतं सतुमोदबुद्धिः॥७८
निमज्ज्य यमुनाजले हरितनुं भगल्भां मुहुः सकंबुरिगदाधनुः सुभगपीतवस्त्रावृतां॥ निरीक्ष्य
शिरसा नमन् स्तवनचातुरीं व्यापपन्समेत्य बहिरादिषां निधिरसौ सम्मुग्धंभर्ता॥७९
समेत्य मथुरां प्रभुः सबल ईश आद्यः पुमान्निहत्य रजकं तदीय पटगुंठितः स्वेच्छया॥ सुदाम
करसंपुटाहृतिमाल्यचाठ्यं सुतस्तदीयमनसेप्सितं वरमसौ ददन्मातुनः॥८०॥ कुब्जा
करारविंदे हृतचंदनकर्दमेनलिप्तांगः तत्तनुकौटिल्यहरः सबलः पद्मापतिः पायात्
८१॥ आगस्स चापशालां हत्वारक्षान्सो धनुर्भंगं विरच्य नगरशोभां पश्यन् राधाप

सु॥

अक्रूर॥
भागवद्
दर्शनि.

तिःपायात् ॥ ८२ ॥ यदाज्ञयानंदसुनंदगोपकाः समेत्य बाह्योपवने प्रसंस्थिताः ॥ तदीयपादां
बुजसन्मरंदके मदीयचित्तालिरसौ विजृंभतां ॥ ८३ ॥ दष्टारिष्टभयं स्वमेकं सोरंगमचीकर
त् ॥ यन्मायया बलहरः करिहा रंगगोवतु ॥ ८४ ॥ रंगंगत्वा मधुरिपुरसौ मुष्टिकादींश्च मल्लां
श्चाणूरादीनपि सहलधकः सूर्यसूनोः क्षयेष्टन् ॥ नीत्वा कंसं गुरुकचभरकर्षयिला निह
त्य स्वः सुःपायात्कौरीकलितरदस्तद्धूबोधकारी ॥ ८५ ॥ आस्तिप्राप्तीकंसभार्ये मागधस्य
पितुर्गृहं ॥ यन्मायया कथयतां गत्वा दृष्टांसनोवतु ॥ ८६ ॥ आश्वास्य नंदपत्नीं नंदमपि श्री
यलोकसंघट्टं ॥ सत्कृत्य सवरत्नसंपत्संपत्सारं जयन्विजानवतु ॥ ८७ ॥ गद्यं ॥ अथ उप

मत्वर चरितचातुरीधुरीणलोकविलोचनकृतकौतुकः श्रीपतिः प्रचुरसुख्यखर्वीकृतासर्वदा
रितदितिसुतगर्वपालितपर्वकालद्विजवृंदाश्रितद्वारावादिदेयनिवासीभूतस्वर्गसुखवर्गः ॥ अ
विरलनिर्जितकोमलकदलीकंदलीगर्भांतरसारविदारितकरभभारमाधुर्यं ॥ अधिष्ठितो
जयति पित्रंकं ॥ ८८ ॥ ससांत्वयित्वा पितरौ वचोभिर्नयादिमाधुर्यकलाकलापैः ॥ कलानि
धर्होद्यचयचारुचूडस्ताभ्यां समाश्लिष्टतनुर्मुदेस्तु ॥ ८९ ॥ अथोपनीतः सबलो मुरारिस्त
दोग्रसेनं त्वभिषिच्य राज्ये ॥ सांदीपिनेः प्राप्य कलाः समस्ताः श्रुतिं स्मृतिं चाप्यवधुत्प्रग
ल्भः ॥ ९० ॥ समर्प्य गुरवे सुतं समधिगम्य तस्मात्परं विलक्षणमलक्षणोप्यरिकुलस्य

५२

॥मूल॥

रत्नाकरणः॥क्षणेक्षणविलक्षणंचरितमाचरन्लीलयासमेत्यनिजमंदिरंजयतिसाधुचेतोहरः
९१ सरसीरुह सुंदाहरलोचनगोपालकामिनीनांयः विरहज्वरमपहर्तुंप्रेषयतिस्मोद्धवं
वसनःपातु ९२॥नंदंसभार्यंबतगोपगोपीवृंदंवियोगज्वरपीडितंयः॥आश्वास्यसन्मानि
ततश्चरित्रैःसकौतुकःपातुसकृष्णभक्तः॥ ९३ मथुरामुपेत्यनमवेक्ष्यहरागमणीपस्यतच्च
रणतामरसे निजगाद्धवृत्तमथगोष्ठगतंसमुदामुदारनिधिरस्तुमुदे ९४ कुब्जालयंप्राप्य
तदीयकामंसंपूर्यतस्सेवितपादपद्मः अक्रूरगेहपरिणाहिरूपस्तद्दर्शितोभा तुमस्मन
स्तु॥९५॥अक्रूरमक्रूरमतिंफणींद्रपुरींचरित्रंमगयन्सखीनां॥संप्रेषयामाससमा

४७

विप्रलंभ
शृंगार

५२

नसेमेसदासमुज्ज्वलमुकुंदभारिः॥९६॥अथतच्चरितंकलयन्नुत्रामयन्जननीसुतपांडुसु
तान्सुमतीन् धृतराष्ट्रमयंससुतंवचनैःपरिबोध्यमुदेस्तुपुरींचलितः ९७॥रदनिर्जितमृ
दुकुंदसन्मनाःश्रीपतेःमुनयमुकुंदे॥तच्चरितंगोविंदेकथयन्नास्तांमुदेक्रूरः॥९८ निज
जनपालनशीलंभजअपगतिबालंगुणांबुधेलोलं॥हतदुर्जनबकुलीलंकुंचितवालंननना
मितनलीलं ९९॥घनसुंदरतनुयष्टिंकृतखलयष्टिंसरोजमृदुदृष्टिं स्पर्शीकृतनिजतु
ष्टिंपुरीकृततलोकमीश्वरंवंदे १००॥ताततोमस्यमहानशेषविदुषांमान्योस्तिसद्विलोमा
तायस्यसुरुक्मिणीत्यभिधयाख्यातापियस्यापिच॥श्रीमद्दोरयदोगिरिदोगुरुवरःश्रीवि

४८

श्वनाथाभिधः सोयंगंगकविः सुमंगलतरं भक्तस्तुस्तुकः श्रेयस्तु॥ ३॥ इति श्रीमद्विमणाड्यावादेशासुखप्रवरोद्योतितश्रीरुक्मिणीवल्लभसूरिसूनुश्रीमद्विश्वनाथसूरिच्छात्रावर्यगंगाधरकविभणिते हरिलीलामृताख्यकाव्ये मंगलांकिता कृष्णचरितवर्णनं नाम द्वितीयास्वादः २॥ श्रीमद्भवान्यैवंभनित्रूभहंत्र्येकामपूरिण्यै नमोस्तु॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

श्रीगणेशायनमः॥ अथ हरिलीलामृताख्यस्य काव्यस्य तृतीयास्वादः प्रारभ्यते॥ अथ नमामि रमापतिमीश्वरं प्रणतपारदपारदपारदं॥ कमललोचनलोचितचेटकं विजितशारदचंद्रमुखांबुजं॥ १॥ मगधवंशविभूषणमागतं बलयुतं प्रधनेषु मचीकरत्॥ बलयुतस्तुप

अनुप्रास

जरासंध ... आक्रमण

कालयवनाचे मथुरेवर आक्रमण

५०

वि२

रास्त्रमशास्तकंहिनयवारमहप्रणमामितं॥ २॥ यवनदारणकारणमीगितेदोगिरिबिलं मुचुकुंदनृपाश्रितं॥ गतइताततइतींगितः सुतोजलधिपूरवरीवंगरीवदः स्यतु॥ ३॥ मथुपुरीस्थितबांधवसंग्रहं जलधिपत्तनगं विरचय्य यः॥ द्विजमुखादधिगत्य वलभांगिरं कलितभीमसुतां स्मरितो वतु॥ ४॥ विजित्य सर्वान्नृपतीन्गृहीत्वा स्वयंवरे भीमसुताकरांकं॥ विरूप्य तद्बंधुमभिर्द्रुतः स्वैः कल्याणमव्याहतमातनोतु॥ ५॥ सभीमपुत्र्या सहितो रथेन सद्वारकामेत्य विशालबुद्धिः॥ विवाहमंगल्यलसद्विलासो मुदे सुसंसारितवोगकरान्निः॥ ६॥ रुक्मिण्या उदरे विलोक्य मदनं तं त्रांबरः प्रोच्चलसोदं द्रोहकटाक्षतस्तदपि संविद्यापिनिक्रास्यपः॥ ७॥ वा

रुक्मिणी हरण

प्रद्युम्नाचा जन्म

॥ह०ली०॥
॥२६॥

॥मृत॥

धौसंत्यजतिस्मभीनजठरेस्थइंगतः सोपितंरत्सापतःपरिहृत्यप्रद्रहमगात्तंसज्जनीनंभजे ७॥सत्राजितमणिजनितामपकीर्तिंक्षालयन्निजांतृष्णीं॥ ऋक्षाधिपतिसुतायाजगृहे पाणिंसनःपातु॥८॥अथदत्तानणिमस्मैविवाह्यतत्कन्यकांतदर्थंमृतं शतधन्वतोनुमास्यन्नूगालाक्रूरंसमा नयन्नव्यात्॥९॥कुरुपुरीमधिगत्यरवेःसुताकरसरोजमगृत्यतत्कामिना॥ धवलवाहूसखेनचफाल्गुनातमसनांचसतांचपतिंनुमः॥१०॥योमित्रविंदंपरिणीयसत्यांभद्रांचगार्हस्थ्यकृतश्रमोवै॥ सलक्षणांलक्ष्मणिकांविवाह्यरमन्नसपायात्करगीतलीलः॥११॥निहत्यनरकंमभुस्त्वयनिसंस्तुतस्तत्कृतंविधायनृपतेःप

५१
जांबवतीशी लग्न
मित्रविंदेशी लग्न
अनुप्रास

नरकासुराच्या वधानंतर १००० गोपकन्यांशी विवाह आणि पारिजातकाची प्राप्ति

देनृपसुतासहस्रैःसुतः॥विरच्यकरसद्रहंसुरतरुंगृहीत्वाययोस्वमंदिरमसोमनोमम सदाहरत्साग्निहः॥१२॥सोधेसुधाकिरणचुंबिनिशंबरारिदुर्लभमानत्रारकंपिलहसुरागिः न्यंचत्कधाधवलमंचतलेत्रायानोनर्माचरन्नकमलयाममत्रार्मकुर्यात्॥१३॥विवाहेनिरुद्धस्यत्रालंबलेनप्रहत्यात्मजाधैर्युतन्नांकदोतु॥ वधूसुन्वधूःसद्वधूंहारकांतांसुकांतांनकांतांगतोद्वारकांतां॥१४॥उषाकरग्रहेन्निवंसबाणमात्तकार्मुकः॥विजित्सयादवैःसमंपदंगतःसनोवतु॥१५॥अथकदाचिदसोरमयन्जनान्मृगमुदारमुदारसभाजनं निजपदंगमयन्यदुबालकान्प्रदामयन्परिपातुनिजानमन्॥१६॥बलोबलयुतो

५२
वर्णानुप्रास
अतिसहवासी विवाह
छेकानुप्रास

बलीबलेनबालिकांरवेः॥हलेनकर्षयन्भुजंगतःसपातुपोतकान्॥१७॥श्रीमान्घनन्त्या
मतनुःस्वचिन्हधारंबलंपौंड्रकनामभूपं॥हरंश्चकाशींमदहंस्तादर्थंसपातुकल्याणस्क
धासमुद्रः॥१८॥स्कंदक्षिणंतत्कृतमस्यहर्तुर्हरेःसमुज्जृंभितमंदहासः॥स्वभ कनोद्दार्तिक
रोधतान्नस्तमोपहःसूर्यइवोद्गतोसौ॥१९॥हलधरोप्यपरिवानरमाहनद्द्विविदसंज्ञमुरीकृ
तसत्कृपः॥ध्वजतडित्तनुलोलसदंगनागणयुतोस्तुनमोममतत्पदे॥२०॥अंबिकासुत
कृतस्यकन्यकांकृष्णसूनुरहरत्स्वयंवरे॥तद्विरोधिकुरुवर्गहृत्पुरंकर्षयन्हलधरः
श्रियंक्रियात्॥२१॥पारदोज्वलरुचिःकुशस्थलींनारदोरिदचरित्रवीक्षणे॥पारदो

प्यभिभजन्गतोभ्रमंसंजगामतदिदंजयत्यलं॥२२॥गार्हस्थ्यसूचयनृस्वानांगृहस्थाश्रममा
चरन्॥तुरंगरथहस्त्यादिरूढःत्रांसतुमंगलं॥२३॥जरासंधकारागृहस्थैर्नृपैर्यःसमभ्यर्थि
तोधर्मराजेनचेष्टे॥अगच्छत्ससंदेहकंचोद्धवात्तान्निरासंव्रजन्गंतुकामोभिपायात्॥२४
अथजरासुतमारणलालसःपवनसूनुसुरेंद्रसुताहृतः॥समभियाच्यसमल्लसमित्करस्त
मपतत्स्यसमांमुदितोवतु॥२५॥अथधर्मसुताभिवंदितश्चतुरोबंधुचतुष्टयेनयः॥अजय
त्किलदिक्चतुष्टयंयजतांयज्ञतनुःसदावतु॥२६॥राज्येभिषिच्यसुतमस्यनतोनृपांस्ता
नुन्मुच्यवायुसुतफाल्गुनयुङ्मुरारिः॥आगत्यहास्तिनपुरंकिलराजसूयेप्यग्रार्हणेरि

पौंड्रक राजाचा वध

वर्णानुप्रास

दोष यमक

बीजली तुल्य दुर्योधनकन्या

छेकानुप्रास

१७

१८

१९

२०

२१

५३

५४

छेकानुप्रास स्वागता

प्रथम आणि तृतीय चरणात

छेकानुप्रास

भीम अर्जुन

वियोगिनी — वृत्त भ्रमन्नाही

— उद्धर्षिणी/वसन्ततिलका

॥ह० की०॥ ॥२८॥ ॥सूत॥

छेकानुप्रास

यमक

महनस्सरिपातुनःस्सः॥२७॥ तत्रैवदुर्योधनमानभंगंकृत्वाजलेभूमिरितिभ्रमेण॥ सन्मानितो
धर्मसुतेनपायादपायतःश्रीमधुकैटभारिः॥२८॥ शाल्वोनामनृपःशिवाद्वरमवाप्याकल्पसौ
धंहरेरागत्यप्रचुरास्त्रशस्त्रनिवहःसद्वारकांद्वारकां॥ प्रद्युम्नेनसमिकरोपिबलवान्मायीह
रेर्बाणितोगच्छत्स्वपदमस्तुतन्मनगसिमेसच्चेष्टितंश्रीपतेः॥२९॥ शिशुपालबंधुमाराद्भियं
तंयःस्समाहनछीघ्रं॥ सविदूरथदंतमुखंपामान्मामात्तनुस्त्वपायान्मां॥३०॥ युग्मं॥ अथ
तीर्थव्रजार्थंबलोपिगच्छन्कुरोनसूतंयो॥ अनमस्कृतोरुडार्द्रस्तेनारण्येनिहत्यनैमिषके
३१॥ मुनिजनवंदितचरणःपातकनाशायतेरभिक्षसः॥ पर्वणिबल्वलहारीनिजस्कंसकारी

५५

यतिभङ्ग, दोष

छेकानुप्रास

अनुप्रास

गणसंख्या सम नाही

सुदामा भेट,

सनःपायात्॥३२॥ सख्येस्वदान्नेनववींगरिक्षांददन्नूसेहेमींस्रकगीतलीलः॥ ब्रह्मण्यतांस
ज्जनपालकोसौप्रदर्शयन्मोदतुमेत्वदज्ञे॥३३॥ अथस्यमंतपंचकेनिजेर्युतोजगामयोर
वियहेलसत्स्वसत्कयाश्रुतोलसघ्रुतिः॥ मुनींद्रबोधितस्त्वतातयज्ञभारकारकःपुनातुनी
लमेधकां तकांतितांतसत्ततनुः॥३४॥ गच्छसुसर्वेषुनिजांश्चदेवानूस्वतातमात्रादिसुतास्व
कीयां॥ पुरींभजन्मातृनिदेशतःस्वान्समानयन्पातुमृतांश्चबंधून्॥३५॥ इंद्रसुतोपिस्व
भद्रांहरण्यादेशाद्धरन्रथेननिजं॥ नगरंजगामशीघ्रंतादिदंचरितंहरेःपातु॥३६॥ गत्वा
मिथिलांनगरींमैथिलभूपेनवंदितस्वपदः॥ तत्रैवद्विजपूजांभजन्हरिःपातुमांविलम्

यतिभङ्ग

५६

~~यतिभङ्ग~~

यतिभङ्ग

स्यमंत पंचकात ग्रहण स्नानाकरिता आले त्या नंदांनी चर्चा केली

देवकीला मृत पुत्रांचे दर्शन

सुभद्राहरण

ब्रह्मा विष्णु आणि शिव यामध्ये कोण श्रेष्ठ आहे असा भृगुऋषींच्या प्रश्न

॥ह० ली०॥
॥ २१॥

विष्णूची स्तुति.

॥मूल॥

ति२

तिः ३७ श्रुतिसंस्तुतपदकमलः कमलारमणः श्रीचंद्रकेण बहु। पीडितमुन्मुच्यासील्लसतु हरिर्मेहृदंबुजे सततं ३८ हरिहरविधिसुरमध्ये कोऽस्ति महानिति विचिन्वता भृगुणा। पदताडितहृत्कमलः कुर्वंस्तत्पदस्महर्हणं पातु ३९ मृतविप्रकृतानयनेनुद्दं पार्थं तदर्थमतवन्निं दहस्त्वा भेनिजामूर्ति मदर्शयन् स कृतयुगागतः पातु ४० अथ स्वमायाल्कस्तितात्मकर्निस्कीनीरगतिं कलयन्मुदार्द्रः सुतात्सुतेनैं दसुबंधुशालीपायादिहालीकृतकीर्तिचंद्रः ४१ इत्थं कृतसच्चरितः स्कंदरनुराश्रितास्मरु तबंधुः रमयान्निजजनसंघं श्रियंत्र मत्कांकुरोत्वं सोऽलक्ष्ण ४२ गद्यं॥ नमस्तुंगांगकांतकांतिच्छटाच्छपटावृतकटितटाश्रि

तोद्भटभटादिसंशोभितटकटकारुतिष्टतनामध्यघटितनीलमणिवच्छोभमानकिरणाय तुच्छीकृतषड्गिपुजनभवणाय। व्याकोचितोचितामलकमलविलसितनीलकोमलकमलकलकलारावकलितत्रिलीमुखमुखरीकृतकूलशालियामुनजलविलासलालसोत्सुककामिनीजनमनोहरणाय। स्मरमणाय। जितखंजरीटांगकांतिसौभाग्यभाग्यशालिलोकावलोकचातुरीधुरीणनयनभ्रमणाय। रमारमणाय॥ ४३॥ त्वदीयपदपंकजं लसतु मे हृदब्जे मुहुः त्वदीयमुखपंकजे नयनखंजनस्तुष्यतु। त्वदीय हृदये ममाकृतिरियं स मुज्जृंभतां त्वदीयकरपल्लवे मम करो त्वलोलाकृतिः ॥ ४४॥ अयेनृपतिमंडलीमुकुटको

पः२

५७ — अक्षर संख्या बरोबर नाही
अक्षर संख्या बरोबर नाही

काव्य गद्य उना-याचा कठोर आणि कोमल वर्णांचा समन्वय साधला आहे

५८

कवीने केलेली भगवत्स्तुति
पृथ्वी वृत्त

